अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य नामानि यथा,—
"थः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राहो भयानकः।
शिली शिरसिजो दण्डी भद्रकाली शिलोच्चयः॥
कृष्णो बुद्धिर्विकर्म्मा च दक्षनाशाधिपोऽमरः।
वरदा भोगदा केशी वामजानुरसोऽनलः ॥
लोलीजम्भयिनी गुह्यः शरच्चन्द्रविदारकः ॥"
इति नानातन्त्रशास्त्रम् ॥

थं, क्ली, रक्षणम्। मङ्गलम्। साध्वसम्। इति मेदिनी। थे, १ ॥

थः, पुं, ( थुड़ संवृतौ+डः।) पर्व्वतः। भयरक्षकः। इति मेदिनी। थे, २ ॥ व्याधिभेदः। भयचिह्नम्। भक्षणम्। इति शब्दरत्नावली ॥

थुड, शि संवृतौ। इति कविकल्पद्रुमः ॥ ( तुदां-परं-सकं-सेट्।) शि, थुड़ति। अथुड़ीत् सुथोड़। इति दुर्गादासः ॥

थुत्कारः, पुं, ( कृ+भावे घञ्। थुदित्यव्यक्त-शब्दस्य कारः करणं यत्र।) निष्ठीवनत्यागा-नुकरणशब्दः ॥

थुर्व्व, ई वधे। इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। थूः थुरौ थुरः। ई, थूर्णः। इति दुर्गादासः ॥

थुर्व्वणं, क्ली, हननम्। थुर्व्वधातोर्भावे अनटि ( ल्युटि ) निष्पन्नम् ॥

थूथू, व्य, निष्ठीवनत्यागानुकरणशब्दः। यथा,— थूथूकृत्य वमद्भिरध्वगजनैरिति हास्यकथा-र्णवम् ॥

थैथै, व्य, वाद्यानुकरणशब्दविशेषः। इति सङ्गीत-दामोदरः ॥

थोड़नं, क्ली, संवरणम्। इति थुडधातोर्भावेऽनट् प्रत्ययः ( ल्युट् ) ॥

---

## द

द, दकारः। स अष्टादशवर्णः तवर्गतृतीय-वर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम् ॥ ( यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥")

अस्य स्वरूपं यथा,—
"दकारं शृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली ॥
रक्तविद्युल्लताकारं दकारं हृदि भावय ॥"
इति कामधेनुतन्त्रम् ॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्व्वति!।
चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम् ॥
अनेकरत्नघटितहारनूपुरशोभिताम्।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य नामानि यथा, नानातन्त्रशास्त्रे।
"दोऽत्रीशो धातकिर्धाता दाता दत्तं कलत्रकम्।
दीनं ज्ञानञ्च दानञ्च भक्तिराह्वनी धरा ॥
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः।
कात्यायनी शिवा दुर्गा लज्जना ना त्रिकण्डकी ॥
स्वस्तिकः कुटिलारूपः कृष्णसोमा जितेन्द्रियः।
धर्म्महृद्वामदेवश्च क्षमा बहुसुवत्सला ॥
हरिद्रापुरमन्त्री च दक्षपाणिस्त्रिरेखकः ॥"

दं, क्ली, ( ददाति आनन्दमिति। दा+बाहुल-कात् कः।) भार्य्य। इत्येकाक्षरकोषः ॥

दः, पुं, ( दै प शुद्धौ वा दा दाने+बाहुलकात् कः।) अचलः। दत्तः। दाता। इति मेदिनी दे, १ ॥ ( दो च्छेदे+डः।) खण्डनम्। इति शब्दरत्नावली ॥ ( यथा, माघे। १९। ११४।
"दाददोदुद्दुद्दादी दादादोदूददी ददोः।
दुद्दादं दददे दुद्दे ददादद ददोऽददः ॥"
"दद्यते इति दादोदानम्। ददाने कर्म्मणि घञ्। दादं ददातीति दाददो दानप्रदः।" इत्यादौ मल्लिनाथकृतटीकायामर्थविशेषा बोद्धव्याः ॥ )

दंशः, पुं, ( दशतीति। दंश दंशने+पचाद्यच्।) कीटविशेषः। डाँश इति भाषा। तत्पर्य्यायः। वनमक्षिका २। इत्यमरः। २। ५। २७ ॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५। इति शब्दरत्नावली ॥ पांशुरः ६ दंशकः ७। इति हारावली ॥ दुष्टमुखः ८ क्रूरः ९ क्षुद्रिका १०। इति राजनिर्घण्टः ॥ ( यथा, मनुः। १। ४५।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ॥"
दशतीव शरीरमिति।) वर्म्म। ( यथा, भागवते। ३। १८। ६।
"पराणुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम् ॥"
दंश+भावे घञ्।) दंशनम्। इति मेदिनी। शे, ७ ॥
("सुप्तता जायते दंशे कृष्णाचातिस्रवत्यसृक् ॥"
इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये ॥ )
दन्तः। इति हेमचन्द्रः। ३। २४८ ॥ खण्डनम्। ( दन्तक्षतम्। यथा, आर्य्यासप्तशत्याम्। ५११।
"वर्णच्युतिर्न ललाटे न लुलितमङ्गं न चाधरे दंशः।
उत्पन्नमहारि वारि च न सृष्टसुगन्धमन्तु-रेण ॥")
दोषः। मर्म्म। सर्पक्षतम्। इति विश्वः ॥ (यथा,
"सर्व्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥
शौतच्चर्म्मान्तवल्कानां मृदुनान्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितम् ॥"
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥
असुरविशेषः। यथा, महाभारते।१२।३।१९:
"सोऽब्रवीदहमासं प्राक् दंशो नाम महासुरः ॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांस-शोणिताशी कीटो जातः। ततः कदाचित् गुरोः परशुरामस्य निद्रां प्रतिपालयितुः कर्णस्य ऊरुदेशं निर्भिद्य शोणितं पीतवान्। ततः परशुरामेणायं शापात् निर्म्मोचितः ॥ एतद्-विवरणन्तु तत्रैवाध्याये द्रष्टव्यम् ॥ )

दंशकः, पुं, ( दशतीति। दन्श+ण्वुल्।) दंशः। इति हारावली। १२३ ॥ ( नृपविशेषः। स तु कम्पनादेशाधिपतिः। यथा, राजतरङ्गिण्याम्। १७८।
"दंशकः कम्पनाधीशः प्रहृष्टे तत्र सक्रुधि।
विद्रुतो विषलाटायां निपत्य निहतः खशैः ॥")
दंशनकर्त्तरि, त्रि ॥

दंशनं, क्ली, ( दशतीव शरीरमिति। दंश+ल्युः।) वर्म्म। (यथा, महाभारते। ३।२६८।१८।
"संनह्यध्वं सर्व्व एवेन्द्रकल्पा
महान्ति चारूणि च दंशनानि ॥"
दन्श+भावे ल्युट्।) दन्तादिना खण्डनम्। इति हेमचन्द्रः ॥ कामड़ान हुलफुटान इति भाषा। ( यथा, महाभारते। ८। ८३। ३४।
"दंशनश्चाहिभिः कृष्णैर्दंष्ट्रिभिश्च जतुवेश्मनि ॥")

दंशभीरुः, पुं स्त्री, ( दंशात् वनमक्षिकातः भीरु-र्भयशीलः।) महिषः। इति त्रिकाण्डशेषः ॥

दंशमूलः, पुं, ( दंशवदुग्रं मूलमस्य।) शिग्रुः। इति राजनिर्घण्टः ॥ ( गुणादयोऽस्य शिग्रुशब्दे ज्ञातव्याः ॥)

दंशितः, त्रि, ( दंशो वर्म्म सञ्जातोऽस्य परिहित त्वादिति। दंश+तारकादित्वात् इतच्।) वर्म्मितः। (यथा, महाभारते। २। २९। २।
"महता बलचक्रेण परराष्ट्रावमर्द्दिना।
हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् ॥"
दंशयते इति। दन्श+णिच्+भावे क्तः।) दष्टः। इति हेमचन्द्रः ॥ ( भासमानः। यथा, महाभारते। ४। ४०। २।
"वारणा यत्र सौवर्णाः पृष्ठे भासन्ति दंशिताः।
सुपार्श्वं सुग्रहश्चैव कस्यैतद्धनुरुत्तमम् ॥"
"दंशिता भासमानाः।" इति नीलकण्ठः ॥)

दंशी, स्त्री, ( क्षुद्रो दंशः। अल्पार्थे ङीष्। यद्वा, दशतीति। दंश+अच्। गौरादित्वात् ङीष्।) क्षुद्रदंशः। इत्यमरः। २। ५। २७। छोट-डाँश इति भाषा ॥

दंष्ट्रा, स्त्री, ( दश्यतेऽनयेति। दन्श+"दाम्नी-शसेति।" ३। २। १८२। इति करणे ष्ट्रन्। यद्वा, "सर्व्वधातुभ्यष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्। गौरादिपाठे पितामहीशब्दस्य पाठात् षितां ङीषोऽनित्यत्वात् टाप्।) दन्त-